# Brahmadidevaih Kritam Shiva Stotram

# બ્રહ્માદિદેવૈઃ કૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Brahmadidevaih Kritam Shiva Stotram

File name : shivastotrambrahmAdidevaiHkRRitaM.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 46 shloka 29-41

Latest update : January 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

# બ્રહ્માદિદેવૈઃ કૃતં શિવસ્તોત્રમ્

દેવા ઊચુઃ -
પ્રીતયે યસ્ય ન રતિર્ન કામો યન્મનોભવઃ ।
ન યસ્ય જન્મનો હેતુસ્તસ્મૈ તુભ્યં નમો નમઃ ॥ ૨૯॥

યસ્ય લોકહિતાયૈવ જાતો જાયાપરિગ્રહઃ ।
ત્ર્યમ્બકાય નમસ્તસ્મૈ સ શિવો નઃ પ્રસીદતુ ॥ ૩૯॥

યન્મન્મથં વિના દેવં શ‍ૃઙ્ગારાદ્યા વિશન્તિ ચ ।
સ્વબલેનૈવ તં દેવં ત્વાં વયં પ્રણતા હરમ્ ॥ ૩૧॥

હિરણ્યરેતાઃ સ્વર્ણાભો યો હિરણ્યભુજાહ્વયઃ ।
સ ત્વં સર્ગહરો દેવો નિત્યં નોઽભિપ્રસીદતુ ॥ ૩૨॥

જગન્મયી યોગનિદ્રા વિષ્ણુમાયા બલીયસી ।
તસ્યાભવત્સ્વયં જાયા તસ્મૈ તુભ્યં નમો નમઃ ॥ ૩૩॥

પઞ્ચભૂતમયં યસ્ય પઞ્ચશીર્ષં વિરાજતે ।
તં પઞ્ચવદનં દેવં ભક્ત્યા ત્વાં પ્રણમામહે ॥ ૩૪॥

સદ્યોજાતમઘોરં ચ વામદેવમુમાપતિમ્ ।
ઈશાનં પ્રણમામોઽદ્ય યં તત્પુરુષમાહ વૈ ॥ ૩૫॥

યોઽસતામશિવો નિત્યં યો વા ભક્તિમતાં શિવઃ ।
શિવાશિવસ્વરૂપાય નમસ્તસ્મૈ શિવાય તે ॥ ૩૬॥

રૂપૈસ્ત્રિભિર્યઃ સ્થિતિસૃષ્ટિનાશં
    વિષ્ણ્વાત્મભિઃ શમ્ભુરિતિ પ્રસિદ્ધૈઃ ।
કરોતિ શશ્વજ્જગતાં નુમસ્તં
    શિવં વિરૂપાક્ષમમું શિવેશમ્ ॥ ૩૭॥

અઃ શૂલખટ્વાઙ્ગમૃગાઙ્કુધારી

યો ગોધ્વજઃ શક્તિમાન્ પઞ્ચરૂપી ।
તસ્મૈ તુભ્યં જાતવેદઃ પ્રભાય
ભૂયો ભૂયો નમો નમઃ શઙ્કરાય ॥ ૩૮॥

બ્રહ્માર્ચિષ્માન્ ભોગભૃદ્દૈત્યહન્તા
યન્તા યોદ્ધા વીતગર્ભો જગત્યાઃ ।
સ ત્વં સ્તુતો નઃ પ્રસીદત્વનન્તો
નિત્યોદ્રેકી ઉક્તરૂપઃ પ્રધાનઃ ॥ ૩૯॥

પરબ્રહ્મરૂપી નિયતૈકમુક્તઃ
પરઞ્જ્યોતિરૂપી નિયતસ્ત્વનન્તઃ ।
પરઃ પારરૂપી નિયતાત્મભાગી
આ નો ભર્ગરૂપી ગિરિશોઽસ્તુ ભૂત્યૈ ॥ ૪૦॥

ઉમાપતિં મહામાયં મહાદેવં જગત્પતિમ્ ।
શિવં શિવકરં શાન્તં નમામઃ સ પ્રસીદતુ ॥ ૪૧॥

ઇતિ કાલિકાપુરાણે ષટ્ચત્વારિંશાધ્યાયાન્તર્ગતં બ્રહ્માદિદેવૈઃ
કૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Brahmadidevaih Kritam Shiva Stotram*

pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*